# सीताराम अष्टकम्

ब्रह्ममहेन्द्रसुरेन्द्रमरुद्गणरूद्रमुनीन्द्रगणैरतिरम्यं क्षीरसरित्पतितीरमुपेत्य नुतं हि सतामवितारमुदारम् ।

भूमिभरप्रशमार्थमथ प्रथितप्रकटीकृतचिद्घनमूर्तिं त्वां भजतो रघुनन्दन देहि दयाघन मे स्वपदाम्बुजदास्यम् ।।1।।

पद्मदलायतलोचन हे रघुवंशविभूषण देव दयालो निर्मलनीरदनीलतनोऽखिललोकहृदम्बुजभासक भानो ।

कोमलगात्र पवित्रपदाब्जरजः कणपावितगौतमकान्त । त्वां. ।।2।।

पूर्ण परात्पर पालय मामतिदीनमनाथमनन्तसुखाब्धे प्राव्रडदभ्रतडित्सुमनोहरपीतवराम्बर राम नमस्ते ।

कामविभञ्जन कान्ततरानन काञ्चनभूषण रत्नकिरीट । त्वां. ।।3।।

दिव्यशरच्छशिकान्तिहरोज्ज्वलमौक्तिकमालविशालसुमौले कोटिरविप्रभ चारूचरित्रपवित्र विचित्रधनुःशरपाणे ।

चंडमहाभुजदण्डविखण्डितराक्षसराजमहागजदण्डं । त्वां. ।।4।।

दोषविहिंस्त्रभुजंगसहस्त्रसुरोषमहानलकीलकलापे जन्मजरामरणोर्मिमये मदमन्मथनक्रविचक्रभवाब्धौ ।

दुःखनिधौ च चिरं पतितं कृपयाध समुद्धर राम ततो मां । त्वां. ।।5।।

संसृतिघोरमदोत्कटकुञ्जरतृट्क्षुदनीरदपिण्डिततुंडं दण्डकरोन्मथितं च रजस्तम उन्मदमोहपदोज्झितमार्तम् ।

दीनमनन्यगतिं कृपणं शरणागतमाशु विमोचय मूढं । त्वां. ।।6।।

जन्मशतार्जितपापसमन्वितहृत्कमले पतिते पशुकल्पे हे रघुवीर महारणधीर दयां कुरु मय्यतिमन्दमनीषे ।

त्वं जननी भगिनी च पिता मम तावदसि त्ववितापि कृपालो । त्वां. ।।7।।

त्वां तु दयालुमकिञ्चनवत्सलमुत्पलहारमपारमुदारं राम विहाय कमन्यमनामयमीश जनं शरणं ननु यायाम् ।

त्वत्पदपद्ममतः श्रितमेव मुदा खलु देव सदाव ससीत । त्वां. ।।8।।

यः करुणामृतसिन्धुरनाथजनोत्तमबन्धुरजोत्तमकारी भक्तभयोर्मिभवाब्धितरिः सरयूतटिनीतटचारुविहारी ।

तस्य रघुप्रवरस्य निरन्तरमष्टकमेतदनिष्टहरं वै यस्तु पठेदमरः स नरो लभतेऽच्युतरामपदाम्बुजदास्यम् ।।9।।

eAstroHelp
Your Astrology Helpline